चेता-त्री, [1]प्रणिचेता-त्री, चापयिता-चाययिता-त्री, चिकीषिता-चिचीषिता-त्री, चेचीयिता-त्री ;

[2]चिन्वन्-ती, चापयन्-चाययन्-निश्चापयन्-[A]न्ती, चिकीषन्-चिचीषन्-न्ती ;

चेष्यन्-न्ती-ती, चापयिष्यन्-चाययिष्यन्-न्ती-ती, चिकीषिष्यन्-चिचीषिष्यन्-न्ती-ती ; —

[B]चिन्वानः, चापयमानः-चाययमानः, चिकीषमाणः-चिचीषमाणः, चेचीयमानः;

चेष्यमाणः, चापयिष्यमाणः-चाययिष्यमाणः, चिकीषिष्यमाणः-चिचीषिष्यमाणः, चेचीयिष्यमाणः ;

चित्-चिद्-चितौ-चितः, [3]अग्निचित्[C], श्येनचित्[4], कङ्कचित्, रथचक्रचित् ;

चितम्-तः, [5]इष्टकचितम्-पक्वेष्टचितम्, चापितः-चायितः, चिकीषितः-चिचीषितः, चेचीयितः-तवान् ;

चयः, [6]सुचायी, चापः-चायः, चिकीषुः-चिचीषुः, [7]चेच्यः ;

---

1. 'नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च' (8-4-17) इति नित्यं नेर्णत्वम् भवति ।

2. 'स्वादिभ्यः—' (3-1-73) इति श्नुः विकरणप्रत्ययः । 'इको यणचि' (6-1-77) इति यण् । एवं '**चिन्वानः**' इत्यत्रापि ज्ञेयम् ।

3. 'अग्नौ चेः' (3-2-91) इति भूते कर्मणि क्विप् । अग्निं चितवान् इत्यर्थः ।

4. 'कर्मण्यग्न्याख्यायाम्' (3-2-92) इति भूते कर्मणि क्विप् । धातूपपदप्रत्ययसमुदायेन अग्न्याधारस्थलविशेषश्चेद् गम्यते । यथा—श्येन इव चीयते **श्येनचित्**, कङ्क इव चीयते **कङ्कचित्** ।

5. 'इष्टकेषीकामालानां चिततूलभारिषु' (6-3-65) इति पूर्वपदस्य ह्रस्वः । 'पदाङ्गाधिकारे तस्य च तदन्तस्य च' (परिभाषा-30) इति न्यायात् **पक्वेष्टकचितम्** इत्यपि भवति ।

6. ताच्छील्ये णिनिः । 'उपसर्गादृति—' (6-1-91) इति सूत्रे भाष्ये प्रयोगात् ।

7. यङो लुकि, 'न धातुलोप—' (1-1-4) इति निषेधाद् गुणाभावे 'एरनेकाचः—' (6-4-82) इति यणि रूपम् ।

A. 'विस्मापयित्री जनमुग्रसेनजं द्राग् भापयित्री भृशमस्य पश्यताम् । **निश्चापयन्ती** निकटे तदा वियद्युवैरुदस्थादशरीरिणीति गीः ॥' वा. वि. 1-38.

B. 'गता स्यादवचिन्वाना कुसुमान्याश्रमद्रुमान् ।' भ. का. 6-10.

C. '**अग्निचित्** सोमसुत् राजा **रथचक्रचिद**ादिषु । अनलेष्विष्टवान् कस्मान्न त्वयाऽपेक्षितः पिता ॥' भ. का. 6-128.